संस्कृत-वार्ता:

दिनाङ्कः-17.04.2025 सायम् - 06:20

आदौ मुख्यवार्ता:

- उपराष्ट्रपतिना जगदीपधनखड़ेन सर्वोच्चन्यायालय द्वारा सद्यः एव विधेयकानां निर्णयस्य समयसीमा निर्धारण-विषये प्रदत्तादेशमुद्दिश्य चिन्ता प्रकटिता।
- त्रयाणां न्यायाधीशानां पीठेन वक्फ वाय यूजर इति धिया वर्गीकृता: सम्पत्तय: सम्प्रति यथावदेव स्थास्यन्तीति।
- प्रधानमन्त्रिणा नरेन्द्रमोदिना यमुनायाः वर्तमान-स्थितेः समाकलनाय समीक्षोपवेशनस्य अध्यक्षता कृता।
- केंद्रीयमंत्री हरदीप सिंह पुरी इत्यनेन नेशनल हेराल्ड प्रकरणे प्रवर्तननिदेशालयस्य आरोपपत्रप्रदानानन्तरं कांग्रेसदलस्य विरोधप्रदर्शनोपरि आक्षेपोविहितः।
- आईपीएल क्रिकेट-क्रीडाशृंखलायाम् अद्य संध्यायां सार्धसप्तवादने आतिथ्यधायिना मुम्बई-इण्डियन्स इति दलेन सह सन्राईजर्स-हैदराबाद दलस्य क्रीडा भविता।

अथ वार्ताः विस्तरेण

उपराष्ट्रपति-सर्वोच्चन्यायालय:

उपराष्ट्रपतिना जगदीपधनखड़ेन सर्वोच्चन्यायालय द्वारा सद्यः एव विधेयकानां निर्णयस्य समयसीमा निर्धारण-विषये प्रदत्तादेशमुद्दिश्य चिन्ता प्रकटिता। सः अवदत् यत्, भारतेन एतादृशस्य लोकतन्त्रस्य कल्पनापि न कृता यत्र न्यायाधीशाः विधीनां निर्माणं करिष्यन्ति, कार्यकारिणः निर्धारितानि कार्याण्यपि स्वयमेव सम्पादयिष्यन्ति, उच्च-सदनत्वेन च कार्यं करिष्यन्ति। अद्य नवदिल्ल्याः उपराष्ट्रपति-निवासे राज्यसभा- प्रशिक्षूणां षष्ठं समूहं सम्बोधयन् श्रीधनखड़: बलं दत्तवान् यत् सत्तायाः प्रयोगं कुर्वन्तः जनाः अत्यन्तं संवेदनशीलाः भवन्त्विति।

उपराष्ट्रपतेः इयं टिप्पणी सर्वोच्चन्यायालयस्य सद्यः एव प्रसारितस्य निर्णयस्य उपरि आसीत्, यस्मिन् तेन राष्ट्रपति-राज्यपालाभ्याञ्च विधेयकेषु सहमति-प्रदानाय समयसीमा निर्धारिता आसीत्।

सर्वोच्चन्यायालय:

केन्द्रप्रशानसनेन ह्य: न्यायाधीशानां पीठद्वारा समुत्थापितानां त्रयाणां प्रमुख-प्रश्नानां प्रत्युत्तर-प्रदानाय इतोप्यधिक समयस्य अनुरोधानन्तरं सर्वोच्चन्यायालय: अद्य पञ्चविंशत्यधिकद्विसहस्रतमवर्षस्य वक्फ-संशोधनाधिनियम विषयकं वाद-श्रवणं पुन: करिष्यति। मुख्यन्यायाधीश संजीवखन्ना, न्यायाधीश: पी.वी.-संजय-कुमार:, के.वी. विश्वनाथन: इत्येतेषां त्रयाणां न्यायाधीशानां पीठेन सह महाधिवक्ता तुषारमेहता इत्यस्य आश्वासने **वक्फ वाय यूजर** इति धिया वर्गीकृता: सम्पत्तय: सम्प्रति यथावदेव स्थस्यन्तीति।

## प्रधानमन्त्रिणा-यमुनायाः

प्रधानमन्त्रिणा नरेन्द्रमोदिना यमुनायाः वर्तमान-स्थितेः समाकलनाय समीक्षोपवेशनस्य अध्यक्षता कृता। उपवेशनेऽस्मिन् गृहमन्त्री अमितशाहः जलशक्तिमन्त्री सी आर पाटिल:, दिल्ल्या: मुख्यमन्त्री रेखा गुप्ता च उपस्थिता: आसन् ।

## हरदीप सिंह पुरी

केन्द्रीयमन्त्रिणा हरदीप सिंह पुरी इत्यनेन नेशनल हेराल्ड प्रकरणे प्रवर्तननिदेशालयस्य आरोपपत्रप्रदानानन्तरं कांग्रेसदलस्य विरोधप्रदर्शनोपरि आक्षेपोविहितः।

## गृहमन्त्री/सीआरपीएफ

गृहमन्त्रिणा अमितशाहेन केन्द्रीय-आरक्षित-आरक्षिबलस्य कर्मिणां शौर्यस्य प्रशंसा कृता। उक्तञ्च यत् तेषां वीरता इतिहासे सदा स्थास्यतीति। गृहमन्त्रिणा उक्तं यत् षड्विंशत्यधिकद्विसहस्रतमवर्षस्य मार्चमासान्तं यावत् भारतात् नक्सलवाद: समूलं नष्टं यास्यति, अत्र च सीआरपीएफ इत्यस्य वीरभटा: महत्वपूर्णां भूमिकां निर्वक्ष्यन्ति। श्रीशाहः अद्य मध्यप्रदेशस्य नीमचाख्ये स्थले सीआरपीएफ इत्यस्य षडशीतितमे स्थापनादिवसावसरे आयोजिते समारोहे भाषमाण: आसीत्। तेनोक्तं यत् कोबराख्याया: वाहिन्या: वीरा: राष्ट्रात् नक्सलमोचने अभूतपूर्वं कार्यं कुर्वन्त: सन्तीति। तेषाम् अदम्यसाहसाधारेणैव राष्ट्रात् नक्सलवादस्य शमनसङ्कल्पना पूर्तिं यास्यति।

अवसरेऽस्मिन् श्रीशाहेन वीरा: वीरतापुरस्कारेणापि सम्मानिता:। तेन हुतात्मस्थले बलिं गतेभ्य: वीरभटेभ्य: श्रद्धाञ्जलिं समर्पयता वीरभटानां पथसंचलनस्य अपि निरीक्षणं कृतम्।

## राजनाथसिंहः/डिफेन्स-कांक्लेव

रक्षामन्त्रिणा राजनाथसिंहेन उक्तं यत् भारतस्य रक्षाक्षेत्रम् आत्मनिर्भरताया: पथि अग्रे वर्धमानमस्ति, वैश्विकरक्षाक्षेत्रे च भारतस्य निर्यातक्षमता सम्बर्ध्यमानास्ति। एतत् वैश्विकापूर्तिश्रृंखलाया: विनिर्माणेऽपि महत्वपूर्णां भूमिकां संरचयदस्ति। नवदिल्ल्यां **डिफेन्सकांक्लेव-फोर्स ऑद द फ्यूचर** इत्याख्ये सैन्यसङ्गमस्य उद्घाटनसत्रे भाषमाणेन रक्षामन्त्रिणा प्रोक्तं यत् प्रशासनं रक्षाक्षेत्रस्य क्षमताभिवर्धने विशेषध्यानं ददन्नस्ति।

श्रीसिंहेन प्रोक्तं यत् रक्षाक्षेत्रे आत्मनिर्भरताभि-वर्धनाय मन्त्रालयेन वर्षमिमं परिष्कारवर्षत्वेन घोषितमस्तीति।

## आयकर-विधेयक-सभा

पञ्चविंशत्यधिकद्विसहस्रतमवर्षस्य नवीनायकर विधेयकम् आलक्ष्य लोकसभाया: चयनसमित्या: नवदिल्ल्यां संसदभवने उपवेशनं प्रचलति। एकत्रिंशत् सदस्यानां समित्या: अध्यक्षता भाजपेति दलस्य सांसद: बैजयन्त पांडा इत्येष:

कुर्वन् अस्ति। समितिः संसदः प्रावृट्सत्रस्य प्रथमेदिने स्व प्रतिवेदनं प्रस्तोष्यति। पञ्चविंशत्यद्विसहस्रतमवर्षस्य आयकर-विधेयकस्य उद्देश्यम् अस्ति, आयकरेण सम्बन्धितस्य विधेः समेकनं संशोधनं चेति।

**<u>वाड्रा-भाजपा</u>**

भारतीयजनतापार्टीति दलेन काङ्ग्रेसनेतुः प्रियंकागान्धीत्यस्याः पतिना रॉबर्टवाड्रा इत्यमुना सह प्रवर्तननिदेशालस्य अन्वेषणमभिलक्ष्य उक्तं यत् भ्रष्टाचारिणः विरुध्य अयं महान् युद्धोऽस्तीति। नवदिल्ल्यां वार्ताहरैस्सह भाषमाणेन दलप्रवक्ता गौरवभाटिया इत्यनेन आरोपितः यत् वाड्रा इत्यनेन बृहन्मात्रायां भ्रष्टाचारो विहितः, सश्च गतकाङ्ग्रेस-प्रशासनेन संरक्षितः आसीत् तेनोक्तं यत् अस्मिन् भूमि-क्रय-विक्रयप्रकरणे चतुर्षु मासेस्वेव तेन सप्तशतप्रतिशतं यावत् लाभः समर्जितः।

श्रीगौरवेन एतदपि निरसितं यत् वाड्रा-हेराल्ड चेति प्रकरणे राजनीतिक दृष्ट्या सम्बलिते न स्तः इति।

**<u>संयुक्तराष्ट्र-व्यापार-विकाससङ्घटनम्/भारत्</u>**

संयुक्तराष्ट्रव्यापार-विकास-संघटनम् इत्यस्य सद्यः प्रकाशित-प्रतिवेदनानुसारं भारतं वर्षेऽस्मिन् सार्धषड्प्रतिशतस्य वृद्ध्या सह सर्वातिद्रुततया वर्धमाना प्रमुखा अर्थव्यवस्थेति स्थास्यति। अपरत्र भारतेतरा अर्थव्यवस्था अधोगतिशीला संदृश्यते। अस्य वर्षस्य व्यापार-विकासयोः पूर्वानुमान-प्रतिवेदने भारतं तेषु राष्ट्रेषु सम्मेलितमस्ति, यानि राष्ट्राणि उच्चशासकीय -व्ययेन सह मौद्रिकनीतेः प्रोत्साहनपूर्वकं विकासायगतिं ददति। प्रतिवेदने चीनदेशस्य विकासप्र्गतिः दशमलव-चतुरधिक चतुरिति स्थास्यतीति अनुमानमस्ति।

**<u>जलशक्ति</u>**

केन्द्रीयजलशक्तिमन्त्री सीआर-पाटिलः एकम् आभाषीय-पटलं समुद्घाटितवान्। अद्य नवदिल्ल्यां पेय-जलस्य जैवविविधतायाः संरक्षणमुद्दिश्य मन्त्री राष्ट्रिय-स्वच्छ -गंगा-अभियानस्य तत्वावधाने भारतीय-वन्यजीव-संस्थानस्य विभिन्नपरियोजनानां समीक्षोपवेशनञ्च अकरोत्।

**<u>अश्विनी - अद्यतन जङ्गमदूरवाणिः</u>**

भारतस्य अद्यतन जङ्गमदूरवाणिः इत्यस्याः निर्यातः विगतवित्तवर्षे द्विलक्षकोटि-रूप्यकाणां कीर्तिमत्स्तरं प्राप्तवान्। गतवित्तीयवर्षस्य प्रथमदशमासेषु भारतस्य बृहत्तमनिर्यातरूपेण जङ्गम-दूरवाणिः समुद्भूतास्ति। सूचना-प्रौद्योगिक-मन्त्रिणा अश्विनीवैष्णवेन एकस्मिन् सामाजिकान्तर्जालीय संदेशे इदमुक्तम्। सः अवदत्, यत् यत्र त्रयोदशोत्तर-द्विसहस्र, चतुर्दशोत्तर -द्विसहस्रतमयोः सत्रे देशस्य जङ्गम-दूरवाण्याः निर्यातः सप्तषष्ठ्यधिकैकशततमे स्थाने आसीत् तत्रैव अधुना प्रथमस्थानं प्राप्तवानिति। सः अवदत् यत् सर्वकारेण जङ्गमदूरवाण्याः उत्पादनसम्बद्धाः प्रोत्साहनयोजनाः समारब्धाः सन्ति, अस्मै क्षेत्राय अवसरोऽयं महत्त्वपूर्णः अस्ति। मन्त्री उक्तवान् यत्, अस्मिन् क्षेत्रे विशेषतया महिलाभ्यः लक्षशः नूतनानि वृत्यवसराणि सृज्यन्ते।

**<u>ऋतुविज्ञानविभागः</u>**

भारतीय-ऋतुविज्ञान-विभागेन पूर्वानुमानं कृतमस्ति यत् हिमाचलप्रदेशे इतोऽपि दिनद्वयं यावत् ऋतो: असमीचीनता स्थास्यतीति। विभागेन काषायीसञ्चेतना प्रकाशितास्ति यत् विशेषत: अष्टादश-नवदशदिनाङ्कयो: शिमलायां अत्युत्कटवर्षां भविष्यतीति।

**अन्ते क्रीडावार्तासु**

आईपीएल क्रिकेट-क्रीडाशृंखलायाम् अद्य संध्यायां सार्धसप्तवादने आतिथ्यधायिना मुम्बई-इण्डियन्स इति दलेन सह सन्राईजर्स-हैदराबाद दलस्य क्रीडा भविता। ह्य: क्रीडितायां क्रीडायां अतिरोमाञ्चकरीं स्थितिं यावत् सङ्घर्षोऽयं सम्प्राप्त:, यत्र दिल्ली-राजस्थानयोर्दले समानाङ्क धृत्वा सुपर-ओवर इति विशिष्ट कन्दुकक्षेपणचक्रं प्रविष्टे।

अन्ते दिल्लीकैपिटल्स इति दलेन अरुणजेटली-क्रीडाङ्गणे राजस्थानरॉलयल्स इति दलं पराजितम्।

**।। इति वार्ता: ।।**